महौषधिः, स्त्री, ( महती ओषधिः । ) दूर्व्वा । लज्जालुक्षुपः । इति शब्दचन्द्रिका ॥ महास्नानीयद्रव्यविशेषः । यथा,—
"सहदेवी तथा व्याघ्री बला चातिबला तथा ।
शङ्खपुष्पी तथा सिंही अष्टमी च सुवर्च्चला ॥
महौषध्यष्टकं प्रोक्तं महास्नाने नियोजयेत् ॥"
इति गोविन्दानन्दधृतमत्स्यपुराणवचनम् ॥
अपिच ।
"पृश्निपर्णी श्यामलता भृङ्गराजः शतावरी ।
गुडूची सहदेवी च महौषधिगणः स्मृतः ॥"
इति शब्दचन्द्रिका ॥
श्रेष्ठौषधिश्च । (यथा, महाभारते ।३।२८८।६।
"विशल्यौ चापि सुग्रीवः क्षणेनैतौ चकार ह ।
विशल्यया महौषध्या दिव्यमन्त्रप्रयुक्तया ॥"
सञ्जीवनी । यथा, रघौ । १२ । ६१ ।
"दृष्टा विचिन्वता तेन लङ्कायां राक्षसीवृता ।
जानकी विषवल्लीभिः परीतेव महौषधिः ॥"
"महौषधीः सञ्जीवनी लतेव ।" इति तट्टीकायां मल्लिनाथः ॥ )

महौषधी, स्त्री, ( महौषधि + ङीप् । ) श्वेतकण्टकारी । ब्राह्मी । ( पर्य्यायोऽस्या यथा,—
"ब्राह्मी कपोतवङ्का च सोमवल्ली सरस्वती ।
मण्डूकपर्णी माण्डूकी त्वाष्ट्री दिव्या महौषधी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )
कटुका । अतिविषा । इति राजनिर्घण्टः ॥
हिलमोचिका । इति त्रिकाण्डशेषः ॥

मा ङ य माने । इति कविकल्पद्रुमः ॥ ( दिवा०-आत्म०-सक०-अनिट् । ) ङ य मायते । इति दुर्गादासः ॥

मा ङ लि शब्दे । माने । इति कविकल्पद्रुमः ॥ ( ह्वा०-आत्म०-सक०-अनिट् । ) ङ लि मिमीते । श्रुत्या धर्म्मं मिमीते यः । इति हलायुधः ॥ इति तट्टीकायां दुर्गादासः ॥

मा ल माने । इति कविकल्पद्रुमः ॥ (अदा०-पर०-सक०-अनिट् ।) ल माति भूमिं नवेन राजा ।
न मान्ति मानिनो यस्य यशांसि भुवनोदरे ॥"
इति हलायुधः ॥ इति दुर्गादासः ॥

मा, व्य ( मा + क्विप् । ) वारणम् । ( यथा रामायणे । १ । २ । १५ ।
"मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ॥" )
विकल्पः । इति मेदिनी । अव्ययवर्गे, ४८ ॥

मा, स्त्री, ( मा + क्विप् । यद्वा, मा + क । तत टाप् । ) लक्ष्मीः । इति मेदिनी । मे, १ ॥ माता । ( यथा, साहित्यदर्पणे । १० म ।
"मारमा सुषमा चारुरुचा मारवधूत्तमा ।
मात्तधूर्त्तमावासा सा वामा मेऽस्तु मा रमा ॥" )
मानम् । इत्येकाक्षरकोषः शब्दरत्नावली च ॥

मा, मां } त्रि, ( अस्मद् + द्वितीयैकवचने । "त्वामौ द्वितीयायाः ।" ८ । १ । २३ । इति मामित्यस्य स्थाने विकल्पेन मादेशः । ) मदीया कर्म्मता । आमाके इति भाषा ॥ अस्मच्छब्दात् द्वितीयैकवचननिष्पन्नं पदम् । इति व्याकरणम् ॥ ( यथा, देवीभागवते । १ । ५ । ६६ ।
"सिन्धोः पुत्त्रीं रोषिता किं त्वमासि !
कस्मादेनां प्रेक्षसे नाथहीनाम् ।
जानन्नस्ते स्वाशुजातापराधो
युत्याप्येनं मोहितां मां कुरुष्व ॥" )

मांसं, क्ली, ( मन्यते इति । मन ज्ञाने + "मनेर्दीर्घश्च ।" उणा० ३ । ६४ । इति सः दीर्घश्च ।) रक्तजधातुविशेषः । मास् इति भाषा ॥ स तु गर्भस्थबालकस्याष्टभिर्मासैर्भवति । इति सुखबोधः ॥ भागवतमते चतुर्भिर्मासैर्भवति । तत्पर्य्यायः । पिशितम् २ तरसम् ३ पललम् ४ क्रव्यम् ५ आमिषम् ६ पलम् ७ । इत्यमरः ।२।६।६३॥ अस्रजम् ८ जाङ्गलम् ९ कीरम् १० । सर्व्वमांसगुणाः । वातनाशित्वम् । वृष्यत्वम् । बल्यत्वम् । रुच्यत्वम् । बृंहणत्वम् । देशस्थानसात्म्यसंस्थास्वभावैर्भूयो नानारूपत्वञ्च ॥ * ॥ प्रसहभूशयानूपवारिजवारिचारिमांसगुणाः । गुरुत्वम् । उष्णत्वम् । मधुरत्वम् । स्निग्धत्वम् । वातघ्नत्वम् । शुक्रवर्द्धनत्वञ्च ॥ * ॥ विष्किरप्रतुदजाङ्गलमांसगुणाः । लघुत्वम् । शीतत्वम् । मधुरत्वम् । कषायत्वम् । नृणां हितत्वञ्च ॥*॥ अङ्गविशेषमांसगुणाः ।
'एकदेहेऽपि पूर्व्वार्द्धं मृगाणां पक्षिणां परम् ।
सर्व्वेषाञ्च शिरस्कन्धक्रोडचर्म्मयकृद्गुदम् ॥
पादपुच्छान्तमस्तिष्कमुष्ककोडाश्च मेहनाः ।
धातवः शोणिताद्याश्च गुरवः स्युर्यथोत्तरम् ॥'
प्रशस्ताप्रशस्तमांसं यथा,—
'वयस्थं निर्व्विषं सद्योहतं मांसं प्रशस्यते ॥
मृतञ्च व्याधितं शुष्कं वृद्धं बालं विषेहतम् ।
अगोचरहतं व्याड्रक्षदितं मांसमुत्सृजेत् ॥'
अष्टविधा मांसयोनिर्यथा । प्रसहाः १ प्रसह्यभक्षणात् कुररश्येनादयः । भूशयाः २ विलशायित्वात् नकुलगोधादयः । आनूपाः ३ खड्गमहिषवराहादयः । जलजाः ४ कुम्भीरादयः । जलेचराः ५ हंसवकप्रभृतयः । जाङ्गलाः ६ हरिणच्छागादयः । विष्किराः ७ विकीर्य्यचरणात् तित्तिरमयूरकुक्कुटादयः । प्रतुदाः ८ प्रतुद्यचरणात् कपोतपारावतादयः । इति राजनिर्घण्टः ॥ * ॥ अपि च ।
'मांसं वातहरं सर्व्वं बृंहणं बलपुष्टिकृत् ।
प्रीणनं गुरु हृद्यञ्च मधुरं रसपाकयोः ॥' * ॥
अथ तद्भेदाः ।
'मांसवर्गो द्विधा ज्ञेयो जाङ्गलानूपभेदतः ॥'
तत्र जाङ्गलस्य लक्षणं गुणाश्च ।
'मांसवर्गोऽत्र जङ्घाला विलस्थाश्च गुहाशयाः ।
तथा पर्णमृगा ज्ञेया विष्किराः प्रतुदा अपि ॥
प्रसहा अथच ग्राम्या अष्टौ जाङ्गलजातयः ।
जाङ्गला मधुरा रूक्षास्तुवरा लघवस्तथा ॥
बल्यास्ते बृंहणा वृष्या दीपना दोषहारिणः ।
मूकतां मिन्मिनत्वञ्च गद्गदत्वार्द्दिते तथा ॥
बाधिर्य्यमरुचिं छर्द्दिप्रमेहमुखजान् गदान् ।
श्लीपदं गलगण्डञ्च नाशयन्त्यनिलामयान् ॥' * ॥
अथानूपस्य लक्षणं गुणाश्च ।
'कूलेचराः प्लवाश्चापि कोषस्थाः पादिनस्तथा ।
मत्स्या एते समाख्याता पञ्चधानूपजातयः ॥
आनूपा मधुराः स्निग्धा गुरवो वह्निसादनाः ।
श्लेष्मलाः पिच्छिलाश्चापि मांसपुष्टिप्रदा भृशम् ॥
तथाभिष्यन्दिनस्ते हि प्रायोऽपथ्यतमाः स्मृताः ॥' * ॥
अथ जाङ्गलानां गणना विशिष्टा गुणाश्च ।
'हरिणैणकुरङ्गर्ष्यपृषतन्यङ्कुशम्बराः ।
राजीवोऽपि च मुण्डी चेत्याद्या जाङ्गलसंज्ञकाः ॥
हरिणस्ताम्रवर्णः स्यादेणः कृष्णः प्रकीर्त्तितः ।
कुरङ्ग ईषत्ताम्रः स्याद्धरिणाकृतिको महान् ॥
ऋष्यो नीलाङ्गको लोके सरोझ इति कीर्त्तितः ।
पृषतश्चन्द्रबिन्दुः स्याद्धरिणात् किञ्चिदल्पकः ॥
न्यङ्कुर्बहुविषाणोऽथ शम्बरो गवयो महान् ।
राजीवस्तु मृगो ज्ञेयो राजीभिः परितो वृतः ॥
यो मृगः शृङ्गहीनः स्यात् स मुण्डीति निगद्यते ।
जङ्घालाः प्रायशः सर्व्वे पित्तश्लेष्महराः स्मृताः ।
किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः ॥'
अथ विलेशयानां गणना गुणाश्च ।
'गोधाशशभुजङ्गाखुशल्लक्याद्या विलेशयाः ।
विलेशया वातहरा मधुरा रसपाकयोः ।
बृंहणा बद्धविण्मूत्रा वीर्य्योष्णा अपि कीर्त्तिताः ॥'
अथ गुहाशयानां गणना गुणाश्च ।
'सिंहव्याघ्रवृका ऋक्षतरक्षुद्वीपिनस्तथा ।
बभ्रुजम्बुकमार्ज्जारा इत्याद्यास्तु गुहाशयाः ॥
स्थूलपुच्छो रक्तनेत्रो बभ्रुभेदः सनाकुलः ।
गुहाशया वातहरा गुरूष्णमधुराश्च ते ।
स्निग्धा बल्या हिता नित्यं नेत्रगुह्यविकारिणाम् ॥'
अथ पर्णमृगाणां गणना गुणाश्च ।
'वनौकोवृक्षमार्ज्जारवृक्षमर्कटिकादयः ।
एते पर्णमृगाः प्रोक्ताः सुश्रुताद्यैर्महर्षिभिः ॥
स्मृताः पर्णमृगा वृष्याश्चक्षुष्याः शोषिणे हिताः ।
श्वासार्शःकासशमनाः सृष्टमूत्रपुरीषकाः ॥'
अथ विष्किराणां गणना गुणाश्च ।
'वर्त्तकालाववितिरकपिञ्जलकतित्तिराः ।
कुलिङ्गकुक्कुटाद्याश्च विष्किराः समुदाहृताः ॥
विकीर्य्य भक्षयन्त्येते यस्मात् तस्माद्धि विष्किराः ।
कपिञ्जला इति प्राज्ञैः कथिता गौरतित्तिराः ॥
विष्किरा मधुराः शीताः कषायाः कटुपाकिनः ।
बल्या वृष्यास्त्रिदोषघ्नाः पथ्यास्ते लघवः स्मृताः ॥'
अथ प्रतुदानां गणना गुणाश्च ।
'कालकण्ठकहारीतकपोतशशपत्रकाः ।
सारिका खञ्जरीटश्च पिकाद्याः प्रतुदाः स्मृताः ॥
प्रतुद्य भक्षयन्त्येते तुण्डेन प्रतुदास्ततः ।